National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 84-86
© 2025 NJHSR
www.sanskritarticle.com

रोंपिचर्ल वेङ्कट फणिराम्
शोधच्छात्रः,वैखानसागमविभागः,
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपति

Correspondence:
रोंपिचर्ल वेङ्कट फणिराम्
शोधच्छात्रः,वैखानसागमविभागः,
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपति

# श्रीवैखानसभगवच्छास्त्रोक्त विग्रहाराधने प्रतिष्ठा प्रामुख्यम्

रोंपिचर्ल वेङ्कट फणिराम्

**दुर्लभो मानुषो देहः प्राणिनां क्षणभंगुरः।**
**तत्रापि दुर्लभं मन्ये वैकुण्ठप्रियदर्शनम्।।**[1]

अत्यन्तं क्षणिकं मानवजन्मम् अतीव दुर्लभम्। अपि च अस्मिन् एव जीवने भगवद्दर्शनं अद्यापि दुर्लभतरम्। मानवः सृष्टेः जीवजातिषु अत्युन्नतं स्थानं प्राप्तवान्। तस्य कारणं, तेन प्रदत्तं युक्तायुक्तविवेक ज्ञानं बुद्धिकौशलं च। इन्द्रियभोगानां क्षणिकत्वं तथा संसारचक्रस्य दुःसहत्वं सम्यग् विचिन्त्य, सः मोक्षमार्गं अन्वेषयति। एतदेव मुमुक्षुत्वं इति कथ्यते। मुमुक्षुत्वस्य विघ्नकरं मन एव।

अमृतोपनिषदि **"मन एव मनुष्याणां कारणं जन्म मोक्षयोः"** इति । तस्मात् एवं मनः संयम्य भगवतः पक्षे प्रवर्तयितुं मनुष्यजन्म गृहीतो जीवः कर्म – भक्ति – ज्ञान - योगमार्गेषु एकं मार्गं स्वीकृत्य, अन्यान् मार्गान् तदङ्गरूपेण कृत्वा भगवद्पदप्राप्तये प्रयत्नं करणीयम्।

**ध्यानेनात्मनि पश्यन्ति तेचिदात्मानमात्मना।**
**अन्ये सांख्येन योगेन कर्मयोगेन चापरे।।**[2]

उपर्युक्तश्लोकस्य अर्थं परीक्ष्य स्पष्टं भवति यत् केचित् ध्यानेन, केचित् ज्ञानेन अपरेण कर्मणा वा परमात्मानं पश्यन्ति। भवबन्धबद्धाय जीवाय वेदोक्तकर्मयोगस्य, ज्ञानयोगस्य, भक्तियोगस्य च अनुष्ठानेन परमात्मदर्शनस्य मार्गाः बहवः सन्ति । तेषु मार्गेषु कर्ममार्गे प्रतिपादित विग्रहाराधनं परमं श्रेयः प्रददाति। यतः **वैदिकेनार्चनं यत्र तज्जन्मन्येव मुक्तिदम्**[3] इति उक्तत्वात् अस्मिन्नेव जन्मनि मोक्षलाभाय विग्रहाराधनं अत्यन्तं सुलभः, सुगमः च उपायः, श्रेयस्करतमश्च मार्गः भवति। विग्रहाराधनं प्रतिपादयन्ति शास्त्राणि आगमाः इति प्रसिद्धानि। अखिलजगदेककारणभूतः श्रीमन्नारायणः परमतत्त्वेन वैदिकसम्मिलितया यया आगमविपुलतया व्याप्यते सः वैखानसागमः। अस्य वैखानसागमस्य तत्त्वं यत् - **भक्त्या भगवन्तं नारायणं अर्चयेत् - तद्विष्णोः परमं पदं गच्छति** इति। विग्रहरूपेण विष्णोः आराधनात् अर्चारूपे स्थितस्य भगवतः दिव्यमङ्गलविग्रहदर्शनात् नेत्रयोः आनन्दबाष्पपूरणं, शरीरस्य उत्तेजितम्, मनस्य निर्गुण परब्रह्मणिलीनता, हृदयस्य अलौकिकानन्दपूरणता च जायते। एवं मनुष्यः विश्वमेव परमात्मनः रूपमिव अनुभवति तारकोपयमिव। एष एव श्रीमन्नारयण शासनात् अवतीर्णस्य विखनोमुनेः अनुग्रहात् प्रदत्तः श्रीवैखानसभगवच्छास्त्ररूपेण। विश्वव्याप्तायाः देवालयसंस्कृतेः मूलाधारत्वेन प्रतिष्ठितं विग्रहाराधनम्।

**आलयाः**

भारतस्य पावन भूमौ देवालयानि विशिष्टंस्थानं प्राप्तवन्ति। एतानि न तु केवलं भगवतः आवसनिवास स्थानानि, किंतु सर्वमानवजातीं प्रति आध्यात्मिकं च परमार्थिकं च केन्द्ररूपेण विराजन्ति। जीवस्य उन्नतये एतानि साधनरूपाणि स्थितानि, विश्वव्यापिनं परमात्मानं आगमशास्त्रविधिना साकारं कृत्वा, उपचारैः पूजनं संपाद्य, जनानां भक्तिभावं संवर्धयन्ति, अज्ञानतिमिरं दूरीकुर्वन्ति च। एवं जनान् भक्तरूपेण कृत्वा मोक्षसाधनाय मार्गं प्रदर्शयन्ति आलयाः। वस्तुतः न केवलं विग्रहः आलये स्थितः, अपि तु स्वयं आलयः अपि परमात्मस्वरूपमेव।

यदा वयं देवालयनिर्माणं च विग्रहप्रतिष्ठापनं च निरीक्षामः, तदा अस्य देवालयस्य मानवदेहेन तुल्यता स्पष्टतया दृश्यते। वैखानसागमस्य अनुसारं, भगवतः विग्रहः प्रतिष्ठितं गर्भगृहं, तस्य गर्भगृहस्योपरि स्थितं विमानशिखरं, गर्भगृहस्य पुरतः स्थितं अन्तरालं च एतानि सर्वाणि मिलित्वा देवालयरूपेण परिगण्यन्ते।

मुखमण्डपः, महामण्डपः, सिंहद्वारं, गोपुरं च इत्यादयः देवालयस्य द्वितीयं महत्त्वं यथासम्भवम् आवहन्ति। शिखरं गर्भगृहं च मिलित्वा, यत् वेदेषु आगमशास्त्रेषु च शिल्पशास्त्रेषु च **प्रासादः** इति परिभाषितम्। अस्माकं वास्तुशिल्पशास्त्रेषु शिल्परत्नं नाम ग्रन्थे उट्टंकितः एक श्लोकः हिन्दुधर्मदृष्ट्या यत्र भगवान्निवसति स देवालयः परमपावनः भवति। तत्र प्रगाढभक्तिः भक्त्यानुभूतिर्हि सुस्पष्टं प्रकटते। **प्रासादं पुरुषं मत्वा पूजयेत् मन्त्रवित्तमहः** इति। देवालयार्चनं परार्थयजनमिति वैखानसभगवच्छास्त्रे निर्दिश्यते।

**उत्कृष्टः परशब्दोयं तदर्थो मोक्ष उच्येत।**
**मुमुक्षूणां मोक्षदानात्परार्थमिति कथ्यते।।**
**स्वार्धं गृहार्चनं प्रोक्तं परार्धं त्वालयार्चनम्।**[4]

परशब्दस्य मोक्षार्थत्वम् अस्ति। मुमुक्षुभ्यः मोक्षप्रदत्वात् "परार्थयजनमि"ति नाम देवालयार्चनाय प्रतिष्ठितम्। विशेषतः शास्त्रेषु स्थानभेदेन पञ्चधा आलयाः निर्दिष्टाः सन्ति।

**दैवं चापि तथैवार्षं पौराणं मानुषं तथा।**
**स्वयंव्यक्तं च पञ्चैते स्थानानि पृथिवीतले।।**[5]

दैवम् - आर्षम् - पौराणम् - मानुषम् – स्वयंव्यक्तमिति ।

देवताः इति ब्रह्मेन्द्रादिभिः प्रतिष्ठिताः दैवानि, मरीच्यादि - महर्षिभिः प्रतिष्ठितानि आर्षाणि च। तथा, लक्ष्य-जन्याः इति पुराणकालादारभ्य यत् प्रसिद्धं यानि देवालयानि तानि पौराणानि इति कथ्यन्ते। भक्तिश्रद्धासंपन्नैः मनुष्यैः प्रतिष्ठितानि तु मानुषाणि। भगवान् स्वयमेव अनुग्रहतृप्त्यै च निर्मल-करुणाविशेषेण यत्र पुण्यप्रदेशे स्व-सङ्कल्पात् अवतीर्यते तद् स्थानं स्वयम्व्यक्तं इत्युच्यते। एतेषु स्वयंव्यक्तादि आलयेषु परमात्मनः पर – व्यूह – विभव – अन्तर्यामि – अर्चारूपेषु अर्चास्वरूपेण विग्रहे पूज्यमानः अस्ति।

**परोव्यूहश्च विभवश्चान्तर्यामी तथैव च।**
**अर्चाश्चेति हरे रूपमं पञ्चधा विष्कृतं प्रभो।।**[6]

**पररूपः** अखिलाण्डानां सृष्टिमात्र प्रयोजकः। **व्यूहस्स्थिति** प्रयोजक माननादीनां इत्युक्ते शरीर चलनहेतुनां मनोबुद्धिचित्ताहंकारमिति अन्तःकरण चतुष्टयानां अधिदेवतारूपम्। **विभव**रूपाणि तानि यानि दुष्टशिक्षणाय राक्षसवधाय च उत्पन्नानि मत्स्यकूर्मादिरूपाणि। **अन्तर्यामी** नाम सर्वजगतोऽधारभूतः सर्वप्राणिषु अन्तः स्थितः स्वस्वरूपेण व्याप्नोति। **अर्चारूपस्तु सुलभाद्ददाति परमं पदम्** इत्युक्तत्वात् अर्चारूपमागतः परमात्मा, पूजयितुं सुलभरूपेण सन्निधत्ते, अतः परमं पदं (मोक्षं) प्रदानं करोति इति उक्तं अस्ति। तस्मात्, सर्वासु प्राणिषु दुःखान् विनाशयितुं च सुगमं मुक्तिं साधयितुं च परमात्मा स्वस्य अर्चारूपं प्रदत्तवान्। एवं प्रकारेण परमात्मानं विग्रहे अर्चारूपेण आराधयितुं “प्रतिष्ठा” नाम क्रिया शास्त्रेण विधीयते।

**प्रतिष्ठा**

प्रतिष्ठा भारतीयाचारेषु अतीव मान्यं शास्त्रीयं च क्रियाविशेषः। सा केवलं बिम्बस्थापनं न, अपि तु देवतां करचरणाद्यवयवरूपेण आमंत्र्य, प्रासाद पवित्रतया पूरयति। प्रतिष्ठया परमात्मा अर्चारूपेण विग्रहे संस्थाप्यते। एषा "सम्यगासीनो भवेत्" इति भावं प्रतिबिम्बयति - देवः सकलतया, सन्निहिततया च स्थिरतामुपैति।

अस्य शास्त्रस्य प्रतिपादकमहर्षिषु अन्यः कश्चन कश्यपः प्रतिष्ठां विषये स्वग्रन्थे 'कश्यपज्ञानकाण्डे' एवं विधिं विशदयति।

**अथ विष्णोः देवेशस्य प्रतिष्ठाविधिं व्याख्यास्यामः सोऽव्ययः सर्वव्यापी आकाशोपमो निष्कलः परमात्मा ज्ञानेन भक्त्या च युक्तस्य अन्तः सन्निहितो भवति। "आत्मागुहायां निहितोस्य जन्तोः" इति श्रुतिः – तस्याद्भक्तिमता तेन सकलं संकल्प्य भक्त्या मन्त्रैश्च प्रतिष्टापिते बिम्बे भक्तानुकंपया सकलः तद्बिम्बे समाविष्ठः देवः प्रतिष्ठितो भवेत्। अव्यक्तं शाश्वतम् अनादि मध्यान्तम् अतीन्द्रियं देवैरप्यनभिलक्ष्यं यद्वैष्णवं पदं तत्प्राप्तिफलं तदर्चनम् – तस्य मूलं प्रतिष्ठा।**[7]

निष्कलरूपेण स्थितः परमात्मा भक्तानां कृपानुग्रहाय सुगमोपायत्वेन अर्चावताररूपेण विग्रहे अधिष्ठातुं सकलरूपेण परिवर्तनीयः। तस्य सकलरूपस्य सृष्टिः प्रथमतः आचार्येण स्वध्यानसंस्करणेन कल्पितव्या। सा च रूपसंकल्पना कुम्भे आवाह्य, पश्चात् शास्त्रप्रवणविधिना विग्रहे आवाहनीया। एवं प्रकारेण सर्वव्यापकः परब्रह्म प्रतिमां स्थिरतया संस्थाप्यते। एषा प्रक्रिया **"प्रतिष्ठा"** इत्युच्यते। प्रतिष्ठितं विग्रहं तु अव्यक्तं शाश्वतं अनादिमध्यान्तरहितं अतीन्द्रियम्, देवतानामपि अलक्ष्यम् यत्विष्णुपदं तद्परमं पदं प्रददाति। प्रतिष्ठितबिम्बस्य पूजनं कैङ्कर्यविशेषः भवति। तस्याः अर्चनायाः आधारः प्रतिष्ठाकार्यः। अतः एतत् महत्तरं अद्वितीयं च कार्यम्। श्रीवैखानसभगवच्छास्त्रे भृगुप्रोक्त वासाधिकारे एवं प्रकारेण निर्देश्यते।

**प्रतिबुध्या प्रतिष्ठाचेत् प्रतिष्ठेत्युत्यते बुधैः।**
**तेनैव द्विविधं प्रोक्तं सहैव पृधगेनवा ।।**[8]

प्रतिबुध्या इत्यत्र प्रति इति उपसर्गः विशेषार्थकः। अत्र बुद्ध्या इत्यनेन सह योजितः सन्, आचार्यस्य विशिष्टज्ञानं यत् निष्कलं, सर्वव्यापकं, परमात्मतत्त्वं इति सूचयति। आचार्यः विशिष्टं ब्रह्मतत्त्वज्ञानं ज्ञात्वा, निष्कलं सर्वव्याप्तं परमात्मानं सम्पूर्णतया ध्यानपूर्वकं सकलरूपेन विग्रहे प्रतिष्ठाप्य, यथोक्ते पीठे स्थापयित्वा आवाहनं करोति। एषा एव प्रतिष्ठा इति महर्षिषा भृगुणा 'प्रति' इत्युपसर्गः विशेषार्थे प्रयुक्तः। **काष्ठेऽग्निर्मथनादुज्वल्निव निष्कलाऽत्मको विष्णुर्ध्यानमथनेन भक्त्या सङ्कल्पनात्सकलो भवति।**[9] इति मरीचिमहर्षिः प्रतिपादितत्वात् या आत्मनः चित्ते आचार्येण यः रूपः संकल्पितः, स एव रूपेण विष्णुः प्रकाशते। यथा कुम्भकारः कुलालचक्रमध्ये मृत्पिण्डं स्थापयित्वा स्वचिन्तितेन प्रकारेण घटादीन् निर्मिमीत, तथा परमात्मा अपि आचार्येण ध्यानितेन रूपेण एव अनुगृह्णाति। वैखानसागम प्रतिपादकमहर्षीणां मध्ये अत्रिमुनिः समूर्तार्चानायां **प्रतिष्ठा** इत्येषाक्रिया अमूर्तार्चनायां अग्न्याधान **सदृशी** इति प्रकरणे निर्णीतम्।

**अतः परम् प्रवक्ष्यामि प्रतिष्ठाविधि मुत्तमम्।**
**देवार्चनं द्विधाप्रोक्तं अमूर्तं च समूर्तकम्।।**[10]

इत्यारभ्य अमूर्तं नाम गार्हपत्यादिहोमप्रक्रिया या विखानसः कल्पसूत्रे सर्वथा विशदं वर्णयति। समूर्तं नाम आलये नित्यं विद्यमानस्य बिम्बस्य विधिपूर्वकं क्रियमाणं आराधनमिति उच्यते। **"अग्न्याधानं प्रतिष्ठास्यात्"** इति प्रतिष्ठा च अग्न्याधानं च समाना इत्यपि निर्दिशति।

यत्र अमूर्तयजनक्रियायां विना अग्न्याधानं किञ्चन कार्यं साधयितुं न शक्यते। अग्न्याधानं नाम - अरण्यां समाहूतैः ऋत्विजोऽर्थं मन्थदण्डं संस्थाप्य वेदोक्त्या मन्थनक्रियया अग्निं साधयन्ति। तं सुसिद्धं अग्निं विधिपूर्वकं निर्मितेषु गार्हपत्यादिकुण्डेषु प्रतिष्ठाप्य ततः दर्शपूर्णमासयष्टयः, अतिरात्रः, वाजपेयादियज्ञाः क्रियन्ते। यथा अरण्यां सर्वत्र स्थितात् अग्नेः एकत्र मन्थनदण्डेन मन्थनं कृत्वा अग्निः साध्यते, तथा आचार्यः अपि सर्वत्र व्यापिनं परमात्मानं ध्यानयुक्तेन संकल्पेन शास्त्रोक्ततया निर्मिते आलये यथाविधि पीठं स्थाप्य तत्र बिम्बं संस्थाप्य तद्बिम्बे आवाहयति - एषा एव प्रतिष्ठा। आलये अपि प्रतिष्ठां कृत्वा एव पर्वार्चनादि ब्रह्मोत्सवादिकं कर्म सम्पद्यते। यथा अग्निहीनत्वे दर्शपूर्णमासादियष्टयः अनुष्ठातुं अशक्याः, तथैव भगवदालये प्रतिष्टां विना अर्चनोत्सवादिकं कर्म अयुक्तम्। अत एव 'अग्न्याधानं प्रतिष्ठास्यात्'[11]इति वचनेन अग्न्याधानं प्रतिष्ठाया समानत्वं सूचितम्। उद्धवाय भगवता क्रियायोगविषये यदुक्तं, तत्र

**प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयम्।**
**पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥**[12]

इत्यनेन श्लोके प्रथमं प्रतिष्ठाया महत्त्वं प्रतिपाद्य, अनन्तरं पूजादिकं कर्म निर्दिष्टम्। अतः स्पष्टं यत्—**विग्रहाराधनं कर्तुं पूर्वं तं विग्रहम् आगमोक्तविधिना प्रतिष्ठापयितव्यम्।** प्रतिष्ठा हि मूर्तेः आत्मत्वं, देवत्वं च साक्षात्करोति। यावत् प्रतिष्ठा न भवति, तावत् पूजायाः फलमपि न सिध्यति। एवं भगवतः वाक्येन आगमविधानस्य अनिवार्यता प्रतिपाद्यते।

**उपसंहारः**

**पूजां विना प्रतिष्ठां नास्ति न मन्त्रं विना प्रतिष्ठा च।**
**तदुभयविप्रतिपन्नः पश्यतु गीर्वाणपाषणम्।।**[13]

यदा विग्रहे प्रतिष्ठा विधिना सम्पाद्यते, तदा तस्य पूजाया अपि स्थैर्यमुत्पद्यते। प्रतिष्ठया अभिहिते दिव्यतेजसि एव मन्त्रः अपि स्वशक्तिं सम्पूर्णतया प्रकटयति। प्रतिष्ठाशून्यं पूजनं केवलं व्यवहारमात्रं भवति, न तु आत्मसिद्धिप्रदम्। विग्रहस्य आत्मत्वं प्रतिष्ठया एव सम्भवति - अन्यथा शिलारूपमेव तद्वस्तु। यतः प्रतिष्ठा देवस्य आवाहनं, तत्त्वप्रवेशः, शक्ति-संयोजनं च इति अङ्गीकृत्य विना न पूजा फलती। निःसन्देहं मोक्ससाधनमार्गेषु विग्रहाराधना अवर्ज्यं कर्तव्यं इति वक्तुं शक्यते। अर्चावताररूपेण भगवतः आराधनाय पूर्वं परमात्मानं विग्रहे वैदिकविधिना विधिवत् प्रतिष्ठापयितव्यम्। एवं प्रतिष्ठिते विग्रहे यदा भक्तः श्रद्धया अर्चनं करोति तदा सः मोक्षं प्राप्नोति। अतः विग्रहाराधनायाः पूर्वं यत् प्रतिष्ठाकार्यं, तत् अत्यन्तं प्रधानं च महत्त्वपूर्णं च।

**प्रतिष्ठया हि विग्रहे सन्निधिं कुरुते हरिः।**
**पूजया मोक्षदां तस्मात् पूज्या सा प्रतिपत्तये॥**

**पादटिप्पणी –**

1 श्रीमद्भादवतम् – 11 स्कन्दः – 2 अध्यायः – 29श्लोकः
2 श्रीमद्भगवद्गीता – 13 अध्यायः – 24श्लोकः
3 आनन्दसंहिता – 14 अध्यायः – 43श्लोकः उत्तरपादः
4 आनन्दसंहिता – 14 अध्यायः – 3श्लोकः
5 आनन्दसंहिता – 14 आध्यायः – 22 श्लोकः
6 आनन्दसंहिता – 14 अध्यायः – 6श्लोकः
7 काश्यपज्ञानकाण्डे – 59 अध्यायः - प्रतिष्ठाविधिः
8 वासाधिकारे – 7 अध्यायः – 3श्लोकः
9 विमानार्चनाकल्पे – 80 पटलः – सकलस्वभावः
10 समूर्तार्चनाधिकरणे – 27 अध्यायः – 1श्लोकः
11 **समूर्तमालये बिम्बे नित्य विधिवदर्चनम्।**
**अग्न्याधानं प्रतिष्ठास्यादिष्टिः पर्वर्चनादिका।।**
समूर्तार्चनाधिकरणे – 27 अध्यायः – 4श्लोकः
12 श्रीमद्भागवतम् – 11स्कन्दः – 27 अध्यायः – 52 श्लोकः
13 आर्यसप्तशती – 386 श्लोकः